# Shri Ganesha Bahyapuja

# શ્રીગણેશબાહ્યપૂજા

## Document Information

Text title : Ganesha Bahyapuja

File name : gaNeshabAhyapUjA.itx

Category : pUjA, ganesha, mudgalapurANa

Location : doc_ganesha

Author : Traditional

Proofread by : Karthik Chandan.P, Amith K Nagaraj

Description-comments : mudgalapurANaM panchamaH khaNDaH | adhyAyaH 39 | 5.39. 5-72||

Latest update : March 9, 2004

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 10, 2025

*sanskritdocuments.org*

# શ્રીગણેશબાહ્યપૂજા

શ્રીગણેશાય નમઃ ॥

ઐલ ઉવાચ ॥

બાહ્યપૂજાં વદ વિભો! ગૃત્સમદપ્રકીર્તિતામ્ ।
યેન માર્ગેણ વિઘ્નેશં ભજિષ્યસિ નિરન્તરમ્ ॥ ૧॥

ગાર્ગ્ય ઉવાચ ॥

આદૌ ચ માનસીં પૂજાં કૃત્વા ગૃત્સમદો મુનિઃ ।
બાહ્યાં ચકાર વિધિવત્તાં શૃણુષ્વ સુખપ્રદામ્ ॥ ૨॥

હૃદિ ધ્યાત્ત્વા ગણેશાનં પરિવારાદિસંયુતમ્ ।
નાસિકારન્ધ્રમાર્ગેણ તં બાહ્યાંગ ચકાર હ ॥ ૩॥

આદૌ વૈદિકમન્ત્રં સ ગણાનાં ત્વેતિ સમ્પઠન્ ।
પશ્ચાચ્છ્લોક સમુચ્ચાર્ય પૂજયામાસ વિઘ્નપમ્ ॥ ૪॥

ગૃત્સમદ ઉવાચ ॥

ચતુર્બાહું ત્રિનેત્રં ચ ગજાસ્યં રક્ત વર્ણકમ્ ।
પાશાંકુશાદિ-સંયુક્તં માયાયુક્ત પ્રચિન્તયેત્ ॥ ૫॥

આગચ્છ બ્રહ્મણાં નાથ સુરા-ઽસુર-વરાર્ચિત ।
સિદ્ધિ-બુદ્ધ્યાદિ-સંયુક્ત! ભક્તિગ્રહણલાલસ! ॥ ૬॥

કૃતાર્થોઽહં કૃતાર્થોઽહં તવાગમનતઃ પ્રભો ।
વિઘ્નેશાઽનુગૃહીતોઽહં સફલો મે ભવોઽભવત્ ॥ ૭॥

રત્નસિંહાસનં સ્વામિન્ ગૃહાણ ગણનાયક ।
તત્રોપવિશ્ય વિઘ્નેશ રક્ષ ભક્તાન્ વિશેષતઃ ॥ ૮॥

સુવાસિતાભિરદ્ભિશ્ચ પાદપ્રક્ષાલનં પ્રભો! ।

શીતોષ્ણામ્ભઃ કરોમિ તે ગૃહાણ પાદ્યમુત્તમમ્ ॥ ૯॥

સર્વતીર્થાહૃતં તોયં સુવાસિતં સુવસ્તુભિઃ ।
આચમનં ચ તેનૈવ કુરૂષ્વ ગણનાયક ॥ ૧૦॥

રત્ન-પ્રવાલ-મુક્તાદ્યૈરનર્ધ્યૈઃ સંસ્કૃતં પ્રભો ।
અર્ધ્યં ગૃહાણ હેરમ્બ દ્વિરદાનન તોષકમ્ ॥ ૧૧॥

દધિ-મધુ-ધૃતૈર્યુક્તં મધુપર્કં ગજાનન ।
ગૃહાણ ભાવસંયુક્તં મયા દત્તં નમોઽસ્તુ તે ॥ ૧૨॥

પાદ્યે ચ મધુપર્કે ચ સ્નાને વસ્ત્રોપધારણે ।
ઉપવીતે ભોજનાન્તે પુનરાચમનં કુરૂ ॥ ૧૩॥

ચમ્પકાદ્યૈર્ગણાધ્યક્ષ વાસિતં તૈલમુત્તમમ્ ।
અભ્યંગં કુરૂ સર્વેશ! લમ્બોદર! નમોઽસ્તુ તે ॥ ૧૪॥

યક્ષ-કર્દમકાદ્યૈશ્ચ વિઘ્નેશ ભક્તવત્સલ!।
ઉદ્વર્તનં કુરુષ્વ ત્વં મયા દત્તૈર્મહાપ્રભો ॥ ૧૫॥

નાનાતીર્થજલૈર્ઢુણ્ઢે! સુખોષ્ણભાવરૂપકૈઃ ।
કમણ્ડલૂદ્ભવૈઃ સ્નાનં કુરૂ ઢુણ્ઢે સમર્પિતૈઃ ॥ ૧૬॥

કામધેનુ સમદ્ભૂતં પયઃ પરમપાવનમ્ ।
તેન સ્નાનં કુરુષ્વ ત્વં હેરંબ પરમાર્થવિત્ ॥ ૧૭॥

પંચામૃતાનાં મધ્યે તુ જલૈઃ સ્નાનં પુનઃ પુનઃ ।
કુરુ ત્વં સર્વતીર્થેભ્યો ગંગાદિભ્યઃ સમાહૃતૈઃ ॥ ૧૮॥

દધિ ધેનુપયોદ્ભૂતં મલાપહરણં પરમ્ ।
ગૃહાણ સ્નાનકાર્યાર્થં વિનાયક દયાનિધે ॥ ૧૯॥

ધેનુદુગ્ધોદ્ભવં ઢુણ્ઢે ધૃતં સન્તોષકારકમ્ ।
મહામલાપઘાતાર્થં તેન સ્નાનં કુરૂ પ્રભો ॥ ૨૦॥

સારઘં સસ્કૃતં પૂર્ણં મધુ મધુરસોદ્ભવમ્ ।
ગૃહાણ સ્નાનકાર્યાર્થં વિનાયક નમોઽસ્તુ તે ॥ ૨૧॥

ઇક્ષુદણ્ડસમુદ્ભૂતાં શર્કરાં મલનાશિનીમ્ ।
ગૃહાણ ગણનાથ ત્વં તયા સ્નાનં સમાચર ॥ ૨૨॥

યક્ષકર્દમકાદ્યૈશ્ચ સ્નાનં કુરુ ગણેશ્વર ।
અન્ત્યં મલહરં શુદ્ધં સર્વસૌગન્ધ્યકારકમ્ ॥ ૨૩॥

તતો ગન્ધાક્ષતાદીંશ્ચ દૂર્વાંકુરાન્ ગજાનન ।
સમર્પયામિ સ્વલ્પાંસ્ત્વં ગૃહાણ પરમેશ્વર ॥ ૨૪॥

બ્રહ્મણસ્પત્યસૂક્તૈશ્ચ હ્યેકવિંશતિવારકૈઃ ।
અભિષેકં કરોમિ તે ગૃહાણ દ્વિરદાનન ॥ ૨૫॥

તત આચમનં દેવ સુવાસિતજલેન ચ ।
કુરુષ્વ ગણનાથ ત્વં સર્વતીર્થભવેન વૈ ॥ ૨૬॥

વસ્ત્રયુગ્મં ગૃહાણ ત્વમનર્ઘ્યં રક્તવર્ણકમ્ ।
લોકલજ્જાહરં ચૈવ વિઘ્નનાથ નમોઽસ્તુ તે ॥ ૨૭॥

ઉત્તરીયં સુચિત્રં વૈ નભસ્તારાંકિતં યથા ।
ગૃહાણ સર્વસિદ્ધીશ મયા દત્તં સુભક્તિતઃ ॥ ૨૮॥

ઉપવીતં ગણાધ્યક્ષ ગૃહાણ ચ તતઃ પરમ્ ।
ત્રૈગુણ્યમયરૂપં તુ પ્રણવગ્રન્થિબન્ધનમ્ ॥ ૨૯॥

તતઃ સિન્દૂરકં દેવ ગૃહાણ ગણનાયક ।
અંગલેપનભાવાર્થં સદાનન્દવિવર્ધનમ્ ॥ ૩૦॥

નાનાભૂષણકાનિ ત્વમંગેષુ વિવિધેષુ ચ ।
ભાસુરસ્વર્ણરત્નૈશ્ચ નિર્મિતાનિ ગૃહાણ ભો ॥ ૩૧॥

અષ્ટગન્ધ-સમાયુક્તં ગન્ધં રક્તં ગજાનન ।
દ્વાદશાંગેષુ તે ઢુણ્ઢે લેપયામિ સુચિત્રવત્ ॥ ૩૨॥

રક્તચન્દનસંયુક્તાનથ વા કુંકુમૈર્યુતાન્ ।
અક્ષતાન્ વિઘ્નરાજ ત્વં ગૃહાણ ભાલમણ્ડલે ॥ ૩૩॥

ચમ્પકાદિ-સુવૃક્ષેભ્યઃ સમ્ભૂતાનિ ગજાનન ।
પુષ્પાણિ શમી-મન્દાર-દૂર્વાદીનિ ગૃહાણ ચ ॥ ૩૪॥

દશાંગ ગુગ્ગુલં ધૂપં સર્વસૌરભકારકમ્ ।
ગૃહાણ ત્વં મયા દત્તં વિનાયક મહોદર ॥ ૩૫॥

નાનાજાતિભવં દીપ ગૃહાણ ગણનાયક ।
અજ્ઞાનમલજં દોષં હરન્તં જ્યોતિરૂપકમ્ ॥ ૩૬॥

ચતુર્વિધાન્નસમ્પન્નં મધુરં લડ્ડુકાદિકમ્ ।
નૈવેદ્યં તે મયા દત્ત ભોજનં કુરૂ વિઘ્નપ ॥ ૩૭॥

સુવાસિતં ગૃહાણેદં જલં તીર્થ સમાહૃતમ્ ।
ભુક્તિમધ્યે ચ પાનાર્થં દેવદેવેશ તે નમઃ ॥ ૩૮॥

ભોજનાન્તે કરોદ્વર્તં યક્ષકર્દમકેન ચ ।
કુરુષ્વ ત્વં ગણાધ્યક્ષ પિબ તોયં સુવાસિતમ્ ॥ ૩૯॥

દાડિમં ખર્જુરં દ્રાક્ષાં રમ્ભાદીનિ ફલાનિ વૈ ।
ગૃહાણ દેવદેવેશ નાનામધુરકાણિ તુ ॥ ૪૦॥

અષ્ટાંગ દેવ તામ્બૂલં ગૃહાણ મુખવાસનમ્ ।
અસકૃદ્વિઘ્નરાજ ત્વં મયા દત્તં વિશેષતઃ ॥ ૪૧॥

દક્ષિણાં કાંચનાદ્યાં તુ નાનાધાતુસમુદ્ભવામ્ ।
રત્નાદ્યૈઃ સંયુતાં ઢુંઢે ગૃહાણ સકલપ્રિય ॥ ૪૨॥

રાજોપચારકાદ્યાનિ ગૃહાણ ગણનાયક ।
દાનાનિ તુ વિચિત્રાણિ મયા દત્તાનિ વિઘ્નપ ॥ ૪૩॥

તત આભરણં તેઽહમર્પયામિ વિધાનતઃ ।
વિવિધૈરૂપચારૈશ્ચ તેન તુષ્ટો ભવ પ્રભો ॥ ૪૪॥

તતો દૂર્વાંકુરાન્ ઢુંઢે એકવિંશતિસંખ્યકાન્ ।
ગૃહાણ કાર્યસિદ્ધ્યર્થં ભક્તવાત્સલ્યકારણાત્ ॥ ૪૫॥

નાનાદીપસમાયુક્તં નીરાજનં ગજાનન ।
ગૃહાણ ભાવસંયુક્તં સર્વાજ્ઞાનાદિનાશન ॥ ૪૬॥

ગણાનાં ત્વેતિ મન્ત્રસ્ય જપં સાહસ્રકં પરમ્ ।
ગૃહાણ ગણનાથ ત્વં સર્વસિદ્ધિપ્રદો ભવ ॥ ૪૭॥

આર્તિક્યં ચ સુકર્પૂરં નાનાદીપમયં પ્રભો ।
ગૃહાણ જ્યોતિષાં નાથ તથા નીરાજયામ્યહમ્ ॥ ૪૮॥

પાદયોસ્તે તુ ચત્વારિ નાભૌ દ્વે વદને પ્રભો ।
એકં તુ સપ્તવારં વૈ સર્વાંગેષુ નિરંજનમ્ ॥ ૪૯॥

ચતુર્વેદભવૈર્મન્ત્રૈર્ગાણપત્યૈર્ગજાનન ।

મન્ત્રિતાનિ ગૃહાણ ત્વં પુષ્પપત્રાણિ વિઘ્નપ ॥ ૫૦॥

પંચપ્રકારકૈઃ સ્તોત્રૈર્ગાણપત્યૈર્ગણાધિપ ।
સ્તૌમિ ત્વાં તેન સન્તુષ્ટો ભવ ભક્તિપ્રદાયક ॥ ૫૧॥

એકવિંશતિસંખ્યં વા ત્રિસંખ્યં વા ગજાનન ।
પ્રાદક્ષિણ્યં ગૃહાણ ત્વં બ્રહ્મન્ બ્રહ્મેશભાવન ॥ ૫૨॥

સાષ્ટાંગા પ્રણતિં નાથ એકવિંશતિસમ્મિતામ્ ।
હેરમ્બ સર્વપૂજ્ય ત્વં ગૃહાણ તુ મયા કૃતામ્ ॥ ૫૩॥

ન્યૂનાતિરિક્તભાવાર્થં કિંચિદ્ દુર્વાંકુરાન્ પ્રભો ।
સમર્પયામિ તેન ત્વં સાંગાં પૂજાં કુરૂષ્વ તામ્ ॥ ૫૪॥

ત્વયા દત્તં સ્વહસ્તેન નિર્માલ્યં ચિન્તયામ્યહમ્ ।
શિખાયાં ધારયામ્યેવ સદા સર્વપ્રદં ચ તત્ ॥ ૫૫॥

અપરાધાનસંખ્યાતાન્ ક્ષમસ્વ ગણનાયક ।
ભક્તં કુરુ ચ માં ઢુંઢે તવ પાદપ્રિયં સદા ॥ ૫૬॥

ત્વં માતા ત્વં પિતા મે વૈ સુહૃત્સમ્બન્ધિકાદયઃ ।
ત્વમેવ કુલદેવશ્ચ સર્વં ત્વં મે ન સંશયઃ ॥ ૫૭॥

જાગ્રત્-સ્વપ્ન-સુષુપ્તિભિર્દેહ-વાંગ્મનસૈઃ કૃતમ્ ।
સાંસર્ગિકેણ યત્કર્મ ગણેશાય સમર્પયે ॥ ૫૮॥

બ્રાહ્યં નાનાવિધં પાપં મહોગ્રં તલ્લયં વ્રજેત્ ।
ગણેશપાદતીર્થસ્ય મસ્તકે ધારણાત્ કિલ ॥ ૫૯॥

પાદોદકં ગણેશસ્ય પીતં મર્ત્યેણ તત્ક્ષણાત્ ।
સર્વાંતર્ગતજં પાપં નશ્યતિ ગણનાતિગમ્ ॥ ૬૦॥

ગણેશૂચ્છિષ્ટગન્ધં વૈ દ્વાદશાંગેષુ ચર્ચયેત્ ।
ગણેશતુલ્યરૂપઃ સ દર્શનાત્ સર્વપાપહા ॥ ૬૧॥

યદિ ગણેશપૂજાદૌ ગન્ધભસ્માદિકં ચરેત્ ।
અથવોચ્છિષ્ટગન્ધં તુ નો ચેત્તત્ર વિધિં ચરેત્ ॥ ૬૨॥

દ્વાદશાંગેષુ વિઘ્નેશં નામમન્ત્રેણ ચાऽર્ચયેત્ ।
તેન સોऽપિ ગણેશેન સમો ભવતિ ભૂતલે ॥ ૬૩॥

આદૌ ગણેશ્વરં મૂર્ધ્નિ લલાટે વિઘ્નનાયકમ્ ।
દક્ષિણે કર્ણમૂલે તુ વક્રતુણ્ડં સમર્ચયેત્ ॥ ૬૪॥

વામે કર્ણસ્ય મૂલે વૈ ચૈકદન્તં સમર્ચયેત્ ।
કણ્ઠે લમ્બોદરં દેવં હૃદિ ચિન્તામણિં તથા ॥ ૬૫॥

બાહૌ દક્ષિણકે ચૈવ હેરંબં વામબાહુકે ।
વિકટં નાભિદેશે તુ વિઘ્નનાથં સમર્ચયેત્ ॥ ૬૬॥

કુક્ષૌ દક્ષિણગાયાં તુ મયૂરેશં સમર્ચયેત્ ।
વામકુક્ષૌ ગજાસ્યં વૈ પૃષ્ઠે સ્વાનન્દવાસિનમ્ ॥ ૬૭॥

સર્વાંગલેપનં શસ્તં ચિત્રિતં ચાઽષ્ટગન્ધકૈઃ ।
ગાણેશાનાં વિશેષેણ સર્વભદ્રસ્ય કારણાત્ ॥ ૬૮॥

તતોચ્છિષ્ટં તુ નૈવેદ્યં ગણેશસ્ય ભુનજ્મ્યહમ્ ।
ભુક્તિ-મુક્તિપ્રદં પૂર્ણં નાનાપાપનિકૃન્તનમ્ ॥ ૬૯॥

ગણેશસ્મરણેનૈવ કરોમિ કાલખણ્ડનમ્ ।
ગાણપત્યૈશ્ચ સંવાસઃ સદાઽસ્તુ મે ગજાનન ॥ ૭૦॥

ગાર્ગ્ય ઉવાચ ॥

એવં ગૃત્સમદશ્ચૈવ ચકાર બાહ્યપૂજનમ્ ।
ત્રિકાલેષુ મહાયોગી સદા ભક્તિસમન્વિતઃ ॥ ૭૧॥

તથા કુરુ મહીપાલ ગાણપત્યો ભવિષ્યસિ ।
તથા ગૃત્સમદઃ સાક્ષાત્તથા ત્વમપિ નિશ્ચિતમ્ ॥ ૭૨॥

ઇતિ શ્રીમદાન્ત્યે મુદ્ગલપુરાણે ગૃત્સમદકૃતા ગણેશબાહ્યપૂજા સમાપ્તા ॥

- ॥ મુદ્ગલપુરાણં પઞ્ચમઃ ખણ્ડઃ । અધ્યાયઃ ૩૯ । ૫.૩૯। ૫-૭૨॥

- .. mudgalapurANaM pa nchamaH khaNDaH . adhyAyaH 39 . 5.39. 5-72..

Proofread by Karthik Chandan.P, Amith K Nagaraj

*Shri Ganesha Bahyapuja*

pdf was typeset on May 10, 2025

Please send corrections to *sanskrit@cheerful.com*